प्रारम्भ

START

श्रीराष्ट्रिय अभिलेखालय
नेपाल

विषय: आयुर्वेद
पुस्तक नाम: काकचण्डेश्वरी मतम्
ल. सं. ने ११८
वि. सं. ७१
पत्र सं: ५०
आकार २२ ½ × ८ ½

NATONAL ARCHIVES
NEPAL

Subject:
Manscript-Name.
C. No.
S. No.
Folio. No
Size.

Short Title Kākacaṇḍeśvarīmata

NEPAL-GERMAN MANUSCRIPT PRESERVATION PROJECT
National Archives, Kathmandu, Nepal.

Manuscript No. 3 - 418

विषय नं. Āyurveda

Catalogue (बृहत् संक्षिप्त सूचिपत्रम्) vol. No.

TITLE:

Kākacaṇḍeśvarīmata

No. of leaves: 50

Size in cm: 22 ½ × 8 ½

Date of filming: [illegible]

Remarks: [illegible]

Reel No. B 163/3

का·चं·
१

॥श्रीगणेशाय नमः॥भृग्वादिदेवदेवेश महत्पृच्छामि शंकरं।स्कंदाद्याश्च महामाया भृंगा चैव विनायके॥
॥श्रीवक्रतुंडाय नमः॥ ॥कैलासशिखरासीन उमासार्द्ध जगद्गुरुः।योगिन्यष्टकतेचैव गुह्याद्गुह्यतरंप
रं॥सर्वज्ञानप्रकाशाय सर्वज्ञा सर्वहृद्भुय।एतैः कार्य्यकथं देव त्वया सर्वं ममोपरि॥ ॥श्रीईश्वर उवाच
॥कंकाली कालरात्रीच काकचंडा च चाविका।कंकाली कालरात्रीच काकचंडेश्वरी मता॥एवमाद्या
तथा कान्यो योगिनीगणनायके॥नृत्यवाद्यवचोभेदैः सानंदे हृष्टचेतसां।ततस्त्वं भैरवं देवं योगिनीग
णावेष्टितं॥केचित्स्तुवंति सहृष्टाः केचित्स्तुवंति हृष्टकाः।केचिन्नृत्यंति तस्याग्रे केचिद्धास्यं च कुर्वते।ए
तैस्तु ज्ञानचक्रैस्तु अर्चितस्तत्र भैरवः॥ ॥श्रीदेव्युवाच॥दृष्ट्वा तु भैरवं देवं पंचवक्त्रं त्रिलोचनम्॥मानं

राम:
१

दंत्रिदशेशंच बद्धांजलिरभाषत।काकचंडेश्वरी देवी उमादेवी च भैरवी॥ ॥श्रीभैरव उवाच॥सार
भूतं यथा देवि महाज्ञानं च निर्णयं।ज्ञानवादा तु यत्सूर्त्वं मानवैश्चाल्पसिद्धिदः।न पश्यति इदं ज्ञानम
ल्पपादे सगामिनां।वेदानां च वयोर्थेन न सिद्धिस्तेन विद्यते॥अथवा सवरारोहे काकचंडेश्वरी मते
।मुक्तार्थं निखिलं देवि सर्वोपाधि विवर्जितं॥ ॥श्रीकाकचंडेश्वर्युवाच॥कथं काये स्थितो जीवः को
सौ जीवः प्रकीर्त्तितः।कस्मात्स कुरुते कर्म स्थितः संसारपंजरे॥जराव्याधिदरिद्रेण ग्रस्तः संसारबंध
ने।एकेकमन्निजंघत्वे एकेत्कंधवहेनतु।जयशब्दं च माङ्गल्यं एकस्थानेकजन्मवः।किं कुर्वाण
मकुर्वन्ति तस्मात्त्वं ब्रूहि शंकर॥ ॥श्रीईश्वर उवाच॥शृण त्वं काकचामुण्डे साधकानां हितप्रिये

गुह्याद्गुह्यतरं वाक्यं त्वया पृष्टं वरानने । कथयामि समासेन काकचंडेश्वरि श्रृणु ॥ योसावात्मा परो
नित्य मनादिनिधनेश्वरः ॥ स्वरूपं निर्गुणं वापि सर्वव्यापी निरामयः ॥ अनादिकर्म्मसंबद्धः कायस्थो
भवते सदा । जीवोपाधिमयं कर्म्म अज्ञाने संप्रवर्त्तते ॥ तस्मात्कर्म्म प्रयत्नेन संसारे भवते त्वसौ । करो
ति विविधं कर्म्म संसारे काममोहितः ॥ इव्योपायं न जानाति कामभोगेन हेतुना । कृषिवाणिज्य से
वा च स्वामिविक्रियकारकं । वहते काष्ठभारं च तृणभारान नेकधा । कायक्लेशेन कामान इव्योपा
यं करोति सः । कायक्लेशो नरः श्रीमा कुरु कर्माण्यनेकधा । भ्राम्यमाणा नरा येच कामार्थीः काम
चिन्तकाः ॥ जायन्ते मर्त्यलोके तु दारिद्र्याहतचेतसः । जायन्ते बधिरान्धा पंगुकुब्जाश्च खंजकाः ॥

महासंसारबंधेन त्रिगुणेन तु संयुताः । करोति कर्म्म सद्यस्तु अज्ञानाज्ज्ञानवर्ज्जितः ॥ नासौ मुंचति
संसारं कायस्थः कायवर्ज्जितः । अटते घोरसंसारे यन्त्रस्थ घटिका इव ॥ एकं तु कथितं भद्रे यत्त्व
या परिपृच्छता ॥ किमन्यं पृच्छते भद्रे तथान्यं कथयाम्यहं ॥ काकचंडेश्वरीशास्त्रं कथितं निश्च
याम्यहं ॥ इति काकचंडेश्वरीमते ॥ ॥ काकचंडेश्वर्युवाच ॥ कथयामि महादेव कामभोगप्र
साधनम् । अर्थः संपद्यते येन अक्लेशात्परमेश्वर । तदहं श्रोतुमिच्छामि कथयस्व प्रसादतः ॥
पादुका पलयोपंच दिव्यस्त्रीकामसाधनं । अंजनं ईदृशं चैव गुटिका चैव खेचरी ॥ साधकानां
हितं देव भूचराकाशगामिनी ॥ जलुकाबंधमित्याह धातुवाद रसायनं । जारणं मारणं चैव

का॰त॰
३

अवक्तव्यवद्भावणं।अर्थोपायंवदेवेश. बुद्धिमेत्रिपुरांतक।रसकर्मयथादेव सारभूतंवदस्वमे॥ ॥
महादेवउवाच॥शृणुत्वंकाकचामुंडे साधकानां हितप्रिये॥कथयामिसमासेन. ध्रुवंयत्सिद्धिसा
धनम्।नद्रव्येणविनासिद्धि. र्नभोगकाममेवच॥द्रव्यहीनानरामर्त्ये. प्रेतरूपेणसंस्थिताः।अदत्तेम
र्त्यलोकेच. परोपद्रवकारकाः॥ त्वानुपश्चिपरोतेषां. जीवितस्यमृतस्यच।कालसंयोगरूपेण. पांडि
त्यज्ञानसंस्थिताः॥द्रव्यहीनानशोभन्ते. प्राणहीनायथातनुः॥कुष्टिनोप्राणहीनास्तु. मूकाबाधवि
रात्तथा।नपश्यंतिमर्त्यलोकेस्मि. न्द्रव्यार्थमकरध्वजः॥तस्मात्साधयदेवेशि. रसेन्द्रं साधकेश्वरः।
तंदेविकथयाम्यद्य. साधकानां हितंप्रिये॥जारणंमारणादीनि. द्रव्यसाधनमुत्तमम्॥रसानांजा

राम:
३

यतेसिद्धि. कामार्थभोगसाधनं॥वज्रदंडंमुदंडंच. लोहदण्डंतथैवच।एवंचऔषधीत्रीणि. रस
स्यमारणेहितं॥वज्रदंडोथवज्राख्य. लोहदण्डोवटस्यच।मुदंडोवृक्षदंडस्य. समासात्कीर्तितंप्रि
ये॥ग्राहयेत्तत्समासेन साधकोहस्तचेतसः।तद्रसंरससंयुक्तमेकीकृत्यविमर्दयेत्॥अंधमूषां
कृतंध्यातं. रसंचम्रियतेक्षणात्।सहस्रवेधीकरिष्यामि. यदासिद्धोमहारसः॥मूषांवाल्लेपयेत्ते
न. पुराट्यमहौषधीः॥अंधमूषांवमेयत्तु. रसंवंवश्यंविधिः॥पश्चात्पलसहस्रेषु. शुल्वंस
माहयेद्बुधः।क्षारवर्गहितंकृत्वा. सारवर्गाहितंकुरु॥मूषागर्भोदरेक्षिप्तं. धामयेत्तवदिशानले॥
रसेन्द्रंक्षेपयेत्तत्र. तारंभवतिशोभनं॥ ॥इतिकाकचण्डेश्वरीमतेप्रथमःपटलः॥ ॥अथान्यं

का॰ बं॰
४

गोस्तनाकारसंग्राह्यं अथवा वर्तुलां प्रिये। मुषाबंधमिति ख्यातं साधकानां हितं प्रिये २

संप्रवक्ष्यामि मुषाबंधं यथाविधिं। मृत्तिकां ग्राहयेत्प्राज्ञ शुण्पाषाणवर्जितां॥ तुषं नाग द्वयं ग्राह्य
मृत्तिकासं तृतीयकं॥ एकीकृत्य तु संमर्द्य मुषां तां कारयेत्प्रिये॥ अथाश्वगजमलं देवि गृहीत्वा सा
धकः प्रिये। दाहयेत्तं वरारोहे यावद्दह्यते तावत्जेत्॥ वासकस्य तु पत्राणि वल्मीकमृत्तिकासह॥
पेषयेज्जलदंडेन ये चापि वल्लकांक्षिणः॥ अश्वगजमलं दत्त्वा पांशुमिश्रं तु मर्दयेत्॥ कर्त्तव्यं च अयं
कोष्ठं वकनालं च मूषकं। वज्रं च द्रवते सोपि मूषाबंधः प्रकीर्त्तितः॥ तेषां च प्रथमं कृत्वा पश्चात्
कर्म समारभेत्॥ ॥इति मूषाबंधः॥ ॥अथान्यं संप्रवक्ष्यामि रसस्य मारणे विधिं। पूर्वं च औष
धं चाणि ग्राहयेद्वै साधकः॥ मूषां संलेपयेत्तेन धान्यकर्म समारभेत्। रसेन्द्रं म्रियते क्षिप्रं

राम॰
४

कुरु कर्म यथेच्छया॥ तारकं तन्निवत्येव हेमकं तत्क्षणं प्रिये। कृत्वा लोहमयं पात्रं तत्योर्द्धकां
तजं शुभं। अन्योन्यं संपुटं लग्नं तु कारयेत्साधकोत्तमः॥ अधोयंत्रेण संधाम्य आयसं तत्र जारयेत्॥
तत्र खल्वोदरे दत्त्वा जायते नात्र संशयः। षड्गुणं चायसं तत्र हेम चाष्टगुणं भवेत्। क्षीरवृक्षस्तथा
जारी खंजरी उदरविग्रहं। ग्राहयेच्च रसं तेषां आयसं तत्र जारयेत्॥ जारयेन्नात्र संदेहो हयं दृष्ट्वा
यथा स्त्रियः॥ ततो ग्राह्य रसं जारि सर्वं संवेधयेत्ततः॥ हेमं च जायते तत्र धर्मकामार्थसाधनम्॥
हेमं तु षड्गुणं देयं पुराश्चोष च मारणं॥ किमन्यच्छ्रूयसे भद्रे समासात्कथितं मया॥ ॥अथ चतु
र्थपटलः॥ ॥अथान्यं संप्रवक्ष्यामि गुटिकाबंधं यथाविधि। अमरत्वं खेचरत्वं मीढृशीकरण

सुंदरी॥साधयेत्साधको भद्रे रसेन्द्रस्य प्रभावतः॥ रसेन्द्रं जारयेत्प्राज्ञो दंडत्रयसमर्दितं। रे
मतारस्तथा ताम्रं वज्रकांतिं तथायसं॥ एकीकृत्वा रसं वापि जायते पूर्ववद्विधिः॥ लोहएवं
हि लोहांश्च जारयेत्तत्परस्परं॥ वज्रएव हि वज्रांश्च द्रावयेत्ति परस्परम्। रसोपि रसलोहा
नि जारयेत्तत्समं यदि। जारितेमारितं दद्यात् गुटिकां कारयेत्तथा॥ मूषागर्भोदरे क्षिप्त्वा धार
येत्खदिरानले॥ गुटिकाजायतेतेन महाभोग्यप्रदायिनी। सौभाग्यजननी सा तु कांतिपुष्टि
विवर्द्धनी॥ अमरत्वकरी सा तु साधकानां न संशयः॥ क्षोभयेद्दर्शनान्नारीं साधकांश्च तथा
प्रिये॥ यस्य वक्त्रगता सा तु षण्मासं साधकेश्वरे। क्रियते यस्तु देवेशि जीवेदिंद्रायुयुतं त

था॥ अद्यमेकं स्थिता वक्त्रे गुटिका ह्यमरसुंदरी। अयुतद्वयं संजीवेज्जराव्याधिविवर्जितः॥ अद्व
द्वयं क्रमेणैव अयुतत्वत्वारि जीवितं॥ न भिद्यते च शस्त्राणि चक्रवज्रादिमुद्गरैः॥ पुष्पलग्नं यथा
भावं जायते साधकेश्वरि। वज्रदंडादिघातैश्च नाडिनो वह्निभिर्यदि। न भिद्यते नरा सोपि महाका
यो महाबलः॥ जायते नात्र संदेहो गुटिकायाः प्रसादतः॥ साधयेत्साधनाद्देवि काकचंडेश्वरीम
ते॥ इत्यमरसुंदरीगुटिका॥ ॥अथान्यं संप्रवक्ष्यामि गुटिका त्रैलोक्यसुन्दरी। यावद्वक्त्रस्थि
ता देवि सोभिता मदविह्वला। त्रैलोक्यं भवते येन गणगंधर्वघोषितां॥ दर्शनात्क्षोभयेन्ना
री साधकस्य वरानने। कथयामि समासेन गुटिका त्रैलोक्यसुन्दरी। अस्यार्थं कांतिमादाय व

त्रुवैक्रांतिवैक्रमवा:॥गगनमदनारिसंयुक्तं त्रिलोहंवमहारसं।त्रिदंडंमर्द्दयित्वातु क्षारवर्गाहतं
कुरु॥जायतेतुद्वयंभूयो तप्तखल्वोदरेक्षिपेत्।जारितंसमभागेन गोलकंकारयेत्प्रिये॥वज्रमु
षाहृतंध्मातं गुटिकांकारयेत्तथा॥त्रैलोक्यसुंदरीनाम्ना कामदेवसमोभवेत्॥ ॥इतिकाकचंडेश्व
रीमतेत्रैलोक्यसुन्दरीगुटिका॥ ॥अथान्यसंप्रवक्ष्यामि गुटिकांत्रैलोक्यमोहनीम्।यथातुमोहिता
लोके भवतेवज्रसंस्थिता॥यस्यवक्त्रेतुअष्टैकं सजीवेद्दर्षलक्षकम्।अष्टद्वयप्रमाणंतु वज्रकाये
महाबल:॥जायतेनात्रसंदेहो महामदनसंभव:॥विह्वलामोहितानार्यो तरुण्योनात्रसंशय:॥मु
खाद्दद्वंचक्रमध्ये स्वेच्छाचारीचसाधक:॥ ॥अथात:संप्रवक्ष्यामि गुटिकाजायतेयथा।मातंगीका

कचंडातु गजमदहारीणातु।काककोकिलकंभासा वज्रवज्रात्रिकालिका॥हयनरमदनाख्यातुका
कतुंडातथाप्रिये॥शुकचंचुकनारीणा माकुलंकरशुद्दकै:॥मातंगीमातग:पुष्पं काकमितिकाक
जंघिका चंडमितिचाडाली गजमितिगजकुंभिका काकेतिपिप्पलिकातुकाकेतिकोकोरवयो:।
कामेतिअग्निजंदेवि वज्रेतिसिहुंडिका।वद्यतिकामितिरिका हयनरदनमरीस्या॥ ॥इतिकाक
चंडालीकाभिना॥ ॥काकतुंडेतिकाकांडी शक्रेतिशुकचंचुका।उमेतिशाल्मलीकाका म-मि:
।कामितिकच्छिहल्यातु हमितिहस्तकर्णिका॥अंजुलपटीकरूज्ञेया लोहदंडेलोहिनांशुकंत्वस्तदं

दीतिश्चधोपुष्पंविधीयते देवीसहदेविका।कृतिवक्ष्णगवांछिका।ईश्वरीरैश्वर्य्य मदनाशतिमदनफ
लं।रपरेतिरसेश्चैव समासात्कथितोमया। महोषधीगणंदेवि मातंगीपुष्पसंयुतं॥ मर्द्दयेत्सूतकं
देवि सप्ताहंसाधकोत्तम॥तत्साम्येनहेमम्यात् वज्रा अभ्र रससमंकृत्वा मर्द्दयेत्साधकेश्वरः॥गुटि
काजायतेतत्र मोहिनीभुवनत्रये॥देवासुरमनुष्याणां नागगंधर्वकिन्नरैः।कामरूपीभवेत्सोपि विच
रेद्भुवनत्रये॥ सर्वव्याधिविनिर्मुक्तो द्विषष्ठिवरषाकृतिः॥वल्लभः सर्वनारीणां सौभाग्यमतुलंलभेत्
।अजेयः सर्वदेवानां वज्रकायोमहाबलः॥जायतेनात्रसंदेहो काकचंडेश्वरीमते॥ ॥अथातःसंप्र
वक्ष्यामि गुटिकाविजयसुन्दरी॥ यस्यवक्त्रस्थितासद्य वज्रकायोभवेन्नरः।वज्राभ्रकंत्रिलोहंच कांत

आयसमेवच॥सुवर्वकंभ्रामकंतीक्ष्णं रसेन्द्रंजारयेत्ततः॥पुरातुओषधत्रीणि तेनकल्केनमर्द्दयेत्॥
जारितेमारितेदद्या गुटिकांकारयेत्प्रिये॥पुरातुओषधत्रीणि मुषातलेनलेपयेत्॥गुटिकांतेनव
धातु धाम्यकर्मसमारभेत्॥द्रवीभूततत्तोघोटं दिव्यकोटिसमप्रभं॥ पूजांकृत्वामुखेधार्या वज्र
कायोमहाबलः॥अभेद्यः सर्वशस्त्रेषु खड्गचक्रादिमुद्गरैः॥ त्रिशूलफलकेचैव भिद्यमानोनभिद्य
ते॥ वज्रदेहोमहावीर्य्य धावनयोहयमरस्तथा॥सर्वरोगविनिर्मुक्तो भवेद्देसाधकेश्वरः॥दुर्लभः स
र्वनारीणां कामरूपधरोभवेत्।असुराणांजयोभद्रे अभेद्योदेवदानवैः॥इतिशास्त्रप्रभावाद्धि मि
ह्यतेसाधकेश्वरि॥त्वयाहंपृष्ठतोऽर्थेहि काकचंडेश्वरीमते॥ ॥अथान्यांसंप्रवक्ष्यामि गुटिकांका

का॰चं
८

मनोगिनी ॥ खेचरीनामविख्याता देवगंधर्वपूजिता ॥ अटंतिदेवताः सर्वा निरालंबेमहापुरे ॥ गुटिका
याः प्रभावेन खेचरत्वमुपागता ॥ खेचरीतेनसाप्रोक्ता समासेनप्रकीर्तिता ॥ याह्येत्सूतकंप्राज्ञ त्रिसा
हेवेष्टितकुरु ॥ वरुणावृक्षस्यकाष्ठंतु प्रक्षिपेत्तुसमाहितः ॥ पुनःशीतोदकेसाध्य रसवंधमयंविधि
।सुवेसि प्रत्ययशीघ्रं उत्पन्नोनात्रसंशयः ॥ कामरूपीभवेद्देवि त्रैलोक्यमटतेनरः ॥ वल्लभःसर्वना
रीणां सुरगंधर्वकिन्नरैः ॥ सिद्धतेनात्रसंदेहः काकचंडेश्वरीमते ॥ ॥ अथान्यांसंप्रवक्ष्यामि खेचरा
काशगामिनी ॥ दुर्लभः सर्वनारीणां किंपुनर्मानुषायच ॥ अन्यशास्त्रेषूपायेन मुक्तिस्थानंप्रकल्पयेत्
॥ सपिंडमुक्तमित्याहुः काकचंडेश्वरीमते ॥ साधकानांहितार्थाय पृष्ठोतेहं त्वयाप्रिये ॥ आकाशगमन

दाम:
८

भद्रे भवतेसाधकेश्वरः ॥ हयमारीकालरात्री नरमारीगजमारिका ॥ ममारीविष्णुमारीच वाराहीअश्वमा
रिका ॥ माहिषंविष्णुमारीच जलमारीचजाभवेत् ॥ नामान्येतानिमुख्यानि औषधीनांसमासतः ॥ हयेति
हयचंडाली काकेतिमृगचंडिका ॥ गजेतिगजचांडाली ममारीआदित्यभक्तिका ॥ नरमारीचंडिकोम्या
गिरिकर्णिकामपिप्रिये ॥ विष्णुमारीरुद्रजटा जलमारीदुग्धरुथुहः ॥ वाराहमारीत्तुंडीवज्री महि
षमारीतिचंडेतिका ॥ कर्कोटिकातुविज्ञेया विष्णुमारीचकाकतिक्ता ॥ जलमारीअग्निकाप्रोक्ता औषधी
नारंसंहरेत् ॥ तप्तखल्वोदरेमर्द्य सप्ताहंसूतकंसह ॥ मूषगर्भोदरेक्षिप्त्वा धाम्यकर्मसमारभेत् ॥ त्रि
यतेनात्रसंदेहो रसेन्द्रस्तत्क्षणाद्ध्रुवं ॥ मुखेक्षिप्तातुशीघ्रंतु आकाशक्रमतेक्षणात् ॥ त्रैलोक्यमटते

देवि जरामृत्युविवर्जितः ॥ सिद्ध्यते नात्र संदेहो काकचंडेश्वरीमते ॥ आकाशगामिनी गुटिका ॥ ॥ अ
थान्यां संप्रवक्ष्यामि ईदृशी नामखेचरी ॥ गुटिका सिद्धिदा प्रोक्ता रसेन्द्रं सर्ववद्भवेत् ॥ मर्दितं गुटिकां
कृत्वा मातंगीपुष्पकैः सह ॥ कामरूपी वसं मोहे अरुजोग्र पराक्रमः ॥ वाह्मीकन्योद्भवं चैव वेष्टि
तं गोलकं कुरु ॥ पुनस्त्रिलोहे च वेष्टितं पूजां कृत्वा विधानतः ॥ कृष्णचतुर्दशी रात्रौ महापूजां च का
रयेत् ॥ महाफलैश्च संयुक्तं महामांसवलिं हरेत् ॥ कुमारी योगिनी वृन्दं त्वाचार्यं तोषयेत्सदा ॥ भैर
वं वटुकनाथं अर्चयेत्साधकोत्तमः ॥ गंधपुष्पाक्षतैर्दीपैः वस्त्रालंकरणादिभिः ॥ नमस्कृत्या ह्वि
तान्सर्वान् तोषयित्वा प्रयत्नतः ॥ मुखे संक्षिप्य गुटिकां महद्रूपो भवते नरः ॥ क्रीडते गुह्यकैः सार्द्धं भूत

वेतालशाकिनी ॥ ब्रह्मराक्षसगुह्याद्यैः कुष्मांडैः सह क्रीडते ॥ महाबलं जयं सर्वं अवध्यो योगिनीगणैः
॥ अटते सर्वद्वीपांश्च स्वच्छंदगतिगामिनी ॥ भुंजते विविधं भोगं कामरूपी स्त्रिया सह ॥ तथा सो साधको
सहे कामरूपी महाबलः ॥ नरश्छायस्ततो भूत्वा क्रीडते साधकोत्तमः ॥ तथा तु भैरवी देवि क्रीडते गुह्य
कैः सह ॥ इति काकचंडेश्वरीमते ॥ ॥ श्रीकाकचंडेश्वर्युवाच ॥ अहं पृच्छामि देवेश साधकानां हिताय
वै ॥ अक्लेशात्साधनार्थाय दिव्यसिद्धिकरं परं ॥ संस्काररहितं कर्म यथासौ कुरुते नरः ॥ तत्सर्वं ब्रू
हि मे देव यदाद्यास्तु वल्लभा ॥ ॥ श्रीसर्वज्ञ उवाच ॥ शृणु त्वं काकचामुंडे साधकानां हितावहा ॥ क
थयामि समासेन रसेन्द्रमारणं प्रिये ॥ अष्टौषधीर्यथा पूर्वं धामयेत्तु रसैः सह ॥ कामुकी वज्रक

शव पटुकंदीपराजिका ॥ कर्कोटीमृधुपर्णीच काकांडीव्याघ्रपादिका ॥ एतैस्तुमर्द्दयेत्सूतं तप्तखल्व
लोदरेवुमान् ॥ सप्ताहमम्लवर्गैश्च मर्द्दयेत्सुदृढप्रिये ॥ जारितंमारितंतत्र मूषागर्भे क्षिपेद्रसं
धम्यमानमृतंभूत्वा संस्काररहितंभवेत् ॥ सहस्रवेधंकरोति सिद्ध्यतेतुमहारसः ॥ तारकर्मादि
ददेवि हेमकर्त्ता श्रृणुप्रिये ॥ कांक्षाभ्रकंएकपात्र अम्लेक्षिप्यदिनत्रयम ॥ अभ्रकसहितंपारद
मारणम् ॥ ॥बृहत्यारससंयुक्तं मर्द्दयेत्तुयथाविधि ॥ सप्ताहंसाधकोहृष्टो मर्द्दयेत्तेनकंतथो
नवनीतसदृशाकारं अभ्रकंयावदृश्यते ॥ तप्तखल्वोदरेक्षिप्त्वा तेनमध्येरसंक्षिपेत् ॥ रसाभ्रकंम
र्द्दितंक्षिप्त्वा अधोहस्तंप्रदापयेत् ॥ श्वासापासहतंसूतं जायतेनात्रसंशयः ॥ षड्गुणंवायमन्त्र

त्वा हेमचाष्टगुणंभवेत् ॥ मूषागर्भेविसंलेप्य धाम्यकर्मसमारभेत् ॥ लांगली चित्रकंचैव वज्रीकं
धारिकासह ॥ क्षीरकंचुकसंयुक्तं मूषालेपंतुकारयेत् ॥ म्रियतेनद्रुसंक्षिप्तं सहस्रवेधीचजायते
॥हेमतारविधंचैव अलेशात्कथितोरसः ॥ ॥अथान्यंसंप्रवक्ष्यामि अभ्रकस्ययथाविधि ॥ कांक्षा
भ्रकंचपीतंच ग्राहयेत्साधकोत्तमः ॥ बृहत्यारससंयुक्तं मर्द्दयेत्तंप्रयत्नतः ॥ वंगमादाययत्नेनआ
रनालेनिषेचयेत् ॥ अभ्रकंतेनयोर्मध्ये मर्द्दयेत्साधकोत्तमः ॥ ग्राहयेत्तत्क्षणाद्देवि ग्रासएवंचसूत
कम् ॥ रंजतेनात्रसंदेहो कर्मकुर्याद्यथेच्छया ॥ लक्षवेधीतुलिप्त्वातु प्रकाशोसाधकेश्वरि ॥ अ
भ्रकस्यतुयाधुम्रा डोवकंचाभ्रकस्यच ॥ समासेनतुधाम्येत पतंतेविमलाद्रसः ॥ क्षीरकंचुकि

धात्रूर्णं शुद्धं रसेन भावयेत् ॥ निदग्धा वज्रदंडेन तद्रसं भावितं कुरु ॥ एकैकं सप्तवारं तु भावयेत्तत्
प्रयत्नके ॥ रसाभ्रकं क्षिपेत्सुन ॥ क्षीरिकंदरिकल्केदि लेपयेदभ्रमभ्रकं ॥ कांस्यपात्रे क्षिपेत्तच्च वि
त्तरे साधकोत्तम ॥ सूर्यघर्मे वर्तधाग्य सप्ताह साधकोत्तम ॥ द्रावयेच्चात्र संदेहो म्रियं हृष्टा यथा
म्रियः ॥ रससो भागकेकैतु इतिभाग द्वयं विये ॥ अनलेधाम्यतां कृत्वा म्रियते नात्र संशयः ॥ लक्ष
वेधी भवेत्सोपि जायते रसभैरवः ॥ ॥ रसटंका १८ गंधकटंक १८ नवसादरटंका १८ एकत्र करि
पीहना पुट ह्१५ दिन २१ कचीहरदतथा सेगतरैका पुट ह्२ दे मर्द्दन करना रसगंधक नवसाद
र जलजंत्र पकावना मुद्राकीजै मैन मुद्रा मेनसे २ तेल अलसीका मेर २ वरुलाहे के वहाव

ना पानि भरना हिंसा चोथी घाली राषना पुनः मैन पावना पाछे अलसीका तेल पावना हअग्नि देणी पा
निघडे १०० अवटावना पानि ततावना वरू विचे पाछें मोन घरो विल्ली चेरहमे ए वटके दुधमा रिछा
नीये पाछे ताते पानि मांहि गोला वाहिये प्रहर १२ उपरात्ति गाला आपूपासि राषना ॥ इति मैनमुद्रा ॥ ता
वाआधारू पाआवा एकत्र गालिये पत्रकिजर कर करती १ लेपियेअगार मध्ये नावना हमुअलं गुहो
३ ॥ इतिमुद्रा ॥ ॥ अथान्यं संप्रवक्ष्यामि यथा संजायते द्रुतिः ॥ ग्राहयेदभ्रकं प्राज्ञः श्वेतं चाकृष्णमेव
च ॥ पुरासंस्कारसंयुक्तं कर्तव्यं साधकेश्वरि ॥ यवासं चिंचणीकंथारी कंचुकी वज्रदंड्योः ॥ वज्र
कंदार्कक्षीरेण शृंगाटकसटंकणं ॥ क्षारत्रयसमायुक्तं लवणपंचसमन्वितम् । एकीकृत्वा तु क

का·चं
१२

ल्कांतं अत्रपत्राणि लेपयेत् ॥ मूषगर्भे विनिक्षिप्य धामयेत्खदिरानले ॥ द्रवते नात्र संदेहः काम
शक्तिर्यथा स्त्रियः ॥ लक्षवेधकरः सोपि भवत्येव न संशयः ॥ ॥इति काकचंडेश्वरीमते निखिलसा
रं ॥ ॥अथान्यत्संप्रवक्ष्यामि शुल्वस्य कालिकापहं ॥ शुल्वमध्ये स्थितं हेम न जानाति हि साधकः
॥ अम्लवर्गाहतं शुल्वं क्षारवर्गाहतं कुरु ॥ सैंधवे रक्तइन्धेश्च मर्दयेच्छुल्वपत्रकं ॥ आरण्यमुत्प
लं याद्यं पुटद्याद्धि साधकः ॥ कालिकारहितं तेन सप्तवाराणि भैरवि ॥ तच्छुल्वं तारके दत्वा निर्दहे
त्प्रियहेमयोः ॥ भवते तेन सर्वाणि सर्वदोषविवर्जितः ॥ अथातः संप्रवक्ष्यामि शुल्वस्य कालिका
पहम् ॥ शुल्वमध्ये तु यद्धेम आकर्षयति साधकः ॥ गंधकेन हतं कृत्वा नागेन शोधनं ततः ॥ सप्त

रामः
१२

वारं हतं कृत्वा सप्तवारं च शोधयेत् ॥ अतसीपुष्पसंकाशं जायते नात्र संशयः ॥ समभागं समं सू
तं कारयेत्साधकस्तथा ॥ धाम्यमाने हि मित्युक्तं सयते राजभैरव ॥ चंद्रार्कजा च भागं तु हेमं च जा
यते ध्रुवं ॥ इति काकचंडेश्वरीमते ॥ ॥अथान्यत्संप्रवक्ष्यामि तारकर्तारमेव हि ॥ कार्यं च जायते पुंसां
कर्मकार्यार्थसाधकम् ॥ अंकोटकस्य बीजानि ग्राहयेत्साधकोत्तमः ॥ तैलं संग्राहयेत्तस्मात्पंच ताल
कसंयुतं ॥ हिंगुलस्य कृतं सारं मृतवंगं निषेवयेत् ॥ म्रियते नात्र संदेहः सप्ताहात्क्षीरसंयुतः ॥ मृतं
वंगं ततो गृह्य तारं सप्तगुणं भवेत् ॥ एवं च कारयेत्तेन चतुर्थांशेन गोलकं ॥ स्तंभयेद्धस्तकं तेन पृष्टि
का उत्तमा भवेत् ॥ शतवेधं प्रवर्तेत जायते तारमुत्तमं ॥ साधयेद्धर्मकामार्थं अल्पसर्वार्थसाधनं

द्रव्यहीनोपि सिद्ध्येत चण्डिकावदमुत्तमं॥ तालकस्य च सत्वं च मृतवंगं तथा भवेत्॥ मृतस्यो पारि
सत्वं च यथा षोडश सत्कृते॥ तं वंगं रससमं जार्य्यं शुल्ववेधशतांशके॥ तारकं तन्निवत्येव हेम कृत्नी
भूषणप्रिये॥ अर्जुनस्य त्वचो ग्राह्या पंचांगं वासकस्य च॥ दह्यते क्रियते भस्म गजो शुम्रं च क्षिपेत्॥ ना
गनिवायते तत्र सप्ताहं साधकोत्तमः॥ सप्तवारं पुटं तत्तु जायते वज्रसन्निभं॥ नागरूप्यविधिः॥ ॥अथा
न्यं संप्रवक्ष्यामि नागानां रंजनं तथा॥ हेमकं सदृशं नागं भवत्येव न संशयः॥ रसवकं गुणी चैव शाकं
कूपलिकं तथा॥ ब्रह्मवृक्षरसं ग्राह्यं नागं तत्र निषेचयेत्॥ शतांशं वेधसद्धेम मातृकाव समं परं॥
मारयेत्तु पुनर्न्नागं शाकंकोपलिकासहः॥ हेमं तु जायते तेन सर्वदोषहरं परं॥ नागस्य रंजनं ख्यातं

वंगस्य मारणं तथा॥ यदात्वं पृष्ठसे भद्रे तथान्यं कथयाम्यहं॥ जायते हृक्ष्म मोक्षं तु कुरु कर्म्माण्यने
कधा॥ तत्र रक्तोदरे क्षिप्ता रसं तत्र निधापयेत्॥ अधोयंत्रगतो वह्निः धीमयेन्मधुरानले॥ महाकांतितत्तो
जाड्य सत्त्वं तं साधकोत्तमः॥ तदर्द्धं जारये हेम षण्मासान्तक्रमेण तु॥ पुराश्रोष च संयुक्तं ततः संमर्द्दये
त्प्रिये॥ गर्भस्तं जायते तत्र षण्मासादयसंप्रिये॥ ग्राहयेत्तं समासेन रसं तु साधकेश्वरि॥ मूषायां गर्भले
पत्तु पुरादंडत्रयेण तु॥ अंधमूषाकृतं ध्यातं म्रियते सौ महारसः॥ लक्षवेधी भवेत्सो हि धर्म्मकामा
र्थसाधनम्॥ ऐश्वर्य्यगुणसंपन्नं भवते साधकेश्वरि॥ इति काकचंडेश्वरीमते जारणपटलः॥ ॥देह
रक्षणविचारः॥ अथान्यं शृणु देवेशि अमरत्वं यथा भवेत्॥ लक्षकोटिगुणैश्वर्य्यं राजभोगसुखानि

व॥निरुत्थपिंडपातेन जायते लक्षणं ध्रुवं॥ कथयामि च ते देवि पिंडस्य लक्षणानि च॥ रसेन्द्रं गा[illegible]
येत् प्राज्ञो दंडत्रयसुमर्द्दितं॥ शाल्मलीउदरे धार्य्य मण्डकं मे तु सुंदरि॥ यदा सो भजते [illegible]
महारसम्॥ षण्मासं भुंजितो येन वज्रकायो भवेन्नरः॥ अब्दमेकं प्रयोगं तु अयुतं कं संजीवति॥ त्रि
वर्षप्रयोगेन भक्षयेत्तं महारसं॥ अयुतत्रयसंजीवे त्रिरूपद्भवदेहिनः॥ रसेन्द्रं भक्षयेद्यावत्त
सीराशीः कामवर्जितः॥ अक्षयो रजश्चैव वाली पलितवर्जितः॥ संभवेन्नात्र संदेहः काकचं डे
श्वरी मत॥ पुनरन्यं प्रवक्ष्यामि अमरं साधकेश्वरि॥ अभ्रकं कांति लोहश्च रसेंद्रो गंधकस्तथा॥
त्रिदंडं मर्द्दयेत् सर्वं मासमेकं हि सुन्दरि॥ रसेन्द्रं गंधकं क्षिप्य अब्दमेकं तु भक्षयेत्॥ यदा वृक्षं भ

वेत् वृक्षं ग्राहयेत्तं महारसं॥ पूर्जां कृत्वा समासेन भक्षयेत्तं महारसं॥ षण्मासस्य प्रयोगेन जीवेत्तत्रयु
तत्रयम्॥ जरारोगविनिर्मुक्तो वज्रकायो महाबलः॥ इति शाल्मलीकल्पः॥ ॥ अतः परं प्रवक्ष्यामि अ
मरत्वं भवेन्नरः॥ महाकांतिसमो याति अभ्रकं भजते सह॥ मर्दितं कल्केनैव त्रिदण्डं पूर्ववद्विधिः॥
ब्रह्मदंडोदरे धार्य्य अब्दमेकं हि सुन्दरि॥ अब्दान्ते भवते ब्रह्म ब्रतदंडं सुसाधकः॥ संयाद्यं च प्रयत्नेन भ
जेत्तं पूर्ववद्विधिः॥ षण्मासं भजते यस्तु स्वर्गस्याप्यन्तरं स्थितः॥ क्षीराहारी सदा ब्रह्म लक्षवेधी स जी
वति॥ महाकायो महावीर्यो ब्रह्मतुल्यपराक्रमः॥ जायते नात्र संदेहो द्विषष्ठिवार्षिकाकृतिः॥ इति
पलाशब्रह्मवृक्षं॥ ॥ पुनरन्योत्तरं कर्म जायते ब्रह्मविंदतिः॥ अमरत्वं साधकानां लक्षवर्षाणि सुंद

शि॥गंधकंत्रुह्मवीजंतु कटुतुंवीतुपारदं॥ मर्द्दयेत्तत्नुहीतोये आयसंतुममाहितः॥ अह्नेनेवरसदं उ
हिमवतेसाधकेश्वरि॥ गुंजांकृत्वातुसंग्राह्यं वर्षमेकंतुभक्षयेत्॥ कामवर्ज्जितक्षीराशी वज्रकायोभ
योभवेत्॥ इतिव्रह्मदंडरसप्रदाय॥ ॥अथान्यंसंप्रवक्ष्यामि यथासिद्ध्यंतिसाधकाः॥ भोगश्चभजंते
देवि मर्त्यलोकेषुसाधकः॥ ॥अथमृताभ्रसारविधिः॥ अभ्रककांतिलोहंच मृतकंचविमर्द्दय
त॥वज्रतोयेनसंमर्द्य तप्तखल्वोदरेप्रिये॥ धान्यराशिस्थितंमध्ये वर्षमेकंचधारयेत्॥ अह्नातेजा
यतेसूतो भस्मीभूतोनसंशयः॥ भागंतुरक्तिकायात्तु भक्षयेत्तंमहारसं॥ अह्नमेकप्रयोगेन द्विषष्ठ
वार्षिकाकृतिः॥ अक्षयश्चाजयश्चैव कामरूपीमहावलः॥ स्वछंदगमनः सोहि जायतेनाऽत्रसं

शयः॥ ॥अन्यंचसंप्रवक्ष्यामि साधकस्यहितावहं॥ पिंडपातेनयेभीता येचान्येभयवक्रमात्॥ ते
षष्ठंतिमहावीर्य्ये काकचंडेश्वरीमते॥ वाककोटितैलमादाय निंबूरपिवपारदं॥ पारदंमर्द्दयेत्तत्र स
प्ताहंसाधकेश्वरि॥ म्रियतेतत्रसंक्षिप्तं नस्यपानेनियोजयेत्॥ अभ्यंगंकारयेत्तेन षण्मासाद्वरानने॥
अक्षयोअजरश्चैव जरारोगविवर्ज्जितः॥ महाकायोमहावीर्य्यो द्विषष्ठिवार्षिकाकृतिः॥ इतिककोंटी
कल्पः॥ ॥अथान्यंसंप्रवक्ष्यामि भक्षयेद्यस्तुसाधकः॥ क्षीराज्यमधुसंयुक्तं ककोटीवीजचूर्णयोः॥
भक्षयेत्सतुषण्मासं क्षीराशीकामवर्जितः॥ वलीपलितनिर्म्मुक्तो अह्नमेकंहिरसायोः॥ ककोंटीवी
जमादाय सूक्ष्मचूर्णंतुकारयेत्॥ भक्षयेन्मधुसंयुक्तं क्षीराशीवर्जितेंद्रियः॥ अह्नेकस्यप्रयोगेन म

हाकायोमहाबलः॥ अटतेसर्वद्वीपानि काकायुर्भवतेनरः॥ अथवातस्यबीजानि भक्षयेत्घृतसंयुतं
॥अब्दद्वयप्रयोगेन काकद्वयसजीवति॥ तस्यबीजंरसंगंधं भृंगराजेनमर्दयेत्॥ जीवकस्योदरेस्थाप्य
अब्दमेकंसमाहितः॥ अब्दतेगृह्ययत्नेन एकांतेविधिवत्स्थितं॥ शीततापविनिर्मुक्तो वर्षमेकंवसेद्य
दि॥ माक्षिकेणसमायुक्तं शीशशीविजितेन्द्रियः॥ सजीवेत्काकचत्वारि चंडवाताहतोपिवा॥ अटते
सर्वद्वीपांश्च कामरूपीमहाबलः॥ अजेयःसर्वभूतानां वज्रकायोमहाबलः॥ असतेकाकजंघाश्चसा
काडीचमहौषधी॥ तस्यांतेचक्षयोकालो जीवतेकाकपक्षिणां॥ काकाडीकाकसंकाश काकसाक
शलोचना॥ भक्षयेच्चन्नमानुष्यो काकायुर्भवतेनुमः॥ ॥इतिकाकजंघाकल्पः॥ ॥अतःपरंप्रवक्ष्यामि

गुह्यानांचमहौषधी॥ यथातुलभतेदेवि साधकानांहितावहं॥ कामिकाकांकाडीतु कामुंदीकाकमा
चिका॥ गंडीमितिगंडुशीच कामितिकाचमानयोः॥ कामितिकर्कोटाच्चसमितिसमरीभवेत्॥ कामि
तिल्पाचकामितिपिप्पलीभवा॥ कामितिकगुल्येच कामितिभृंगराजकांकामितिकलुजाचकामितिक
दुंतुविनी॥ कालोमितिलोहितंच विमितिस्तंविनिर्मला॥ नामितायेचप्रोक्ताच मितिकामितिकातथा
॥इतिसंकेतवक्ष्यामि साधकानांहितावहं॥ कथयामिसमासेन साधकासिद्धिदायकं॥ एतैस्तुमर्दये
त्सूतं गंधकेनसमन्वितं॥ भक्षयेदाज्ञसंयुक्तं षण्मासात्साधकोत्तमः॥ जितेन्द्रियोपिसीशशी अपु
नेकसजीवति॥ ॥कगुणीतैलेनपारदभक्षणविधिः॥ गंधकंरससंयुक्तं कंगुणीतैलसंयुतं॥ मास

का॰वं॰
१७

येकप्रयोगेन अद्बमेकंतुभक्षयेत ॥ क्षीराशीब्रह्मचारीच लक्षायुत्वंनविद्यति ॥ भवतेसाधकोभद्रे
वज्रकायोनसंशयः ॥ स्वछंदगतिमानंदी रसेंद्रस्यप्रभावतः ॥ काकचंडेश्वरीशास्त्रे साधकेः सिद्धिदा
यकेः ॥ इतिरसकंगुधककंगुणीतैलं ॥ ॥ अथातः संप्रवक्ष्यामि अमरत्वंसाधकोभवेत् ॥ रसगंध
कमासमेकं कंगुणीतैलेमर्द्दयेत ॥ बीजवृक्षोदरेस्थाप्य अद्बमेकंप्रयत्नतः ॥ पूजांकृत्वाततोभक्षे
न्माक्षीकरसमयुतम् ॥ अशनेवर्षमेकंतु क्षीराशीकामवर्जितः ॥ द्विरष्टवार्षिकोजीवे कामरू
पीमहाबलः ॥ अनंतरंप्रयोगानि गुह्याद्गुह्यतरंभवेत् ॥ हरीतकीब्रह्मकल्पं महाकांतिसपारदं
॥ एकत्रमर्द्दनंकृत्वा कंगुणीमध्यमर्द्दयेत ॥ वज्रतोयेनसंमर्द्य नवरक्तोदरेक्षिपे ॥ धान्यराशंतुम

राम॰
१७

ध्यंतु वर्षमेकंधारयेत ॥ अद्बांतेजायतेसूतो भस्मभूतोद्विजायते ॥ भागैकंरक्तिकायाःस्यात् भ
क्षयेत्तुमहारसम् ॥ अद्बमेकप्रयोगेन द्विरष्टवार्षिकाकृतिः ॥ अक्षयोअजयश्चैव कामरूपीम
हाबलः ॥ स्वछंदगमनःसोहि जायतेनात्रसंशयः ॥ इतिहरितकीब्रह्मकल्पः ॥ ॥ अथान्यानिप्र
योगानि रसस्यमारणंतथा ॥ साधकानांहितार्थाय यथासर्वज्ञभाषितम् ॥ याद्दयेतरसेन्द्रोहि प्रो
टलीसूत्रवेष्टितं ॥ वनारीकन्दरेक्षिप्य दीर्घडोलेप्रयोजितम् ॥ स्वानचकारयेद्याव तावद्भिशाट
सोरसः ॥ शंखपुष्पात्प्रलेपात्तु सिद्धेनकेत्रिवारके ॥ मृत्तिकापुनःलेपयेत ॥ धाम्यकर्मसमायोग
मडुस्ततंनदुच्यते ॥ शतांशंवेधयेद्दद्दे धर्मकामार्थसिद्धिदम् ॥ पुराश्रोषधसंयोगा नवस्त्वे

का॰चं॰
१८

क्षिपेद्रसम्॥कुष्मांडंजायतेतत्र आशापाशहतंकुरु॥जायतेमासमेकंतु कुरुकर्म्मयथेछया॥मद
स्ववेधकंसोपि जायतेनात्रसंशयः॥इतिपोटलीपाकरसेन्द्रः॥ ॥अथजलुकाविधिः॥अतःपर
साधकार्थाय कामसिद्धिर्यथाभवेत्॥जलुकाजायतेभद्रे दुर्लभाभुवनत्रये॥अश्वचांडालिका
कंदं रसंतेनैवमर्द्दयेत्॥स्वनारीकंदरेक्षिप्य वाम्यकर्म्मतथाकुरु॥पुनस्तुमर्द्दनंकृत्वा अश्वगं
धकरसेनतु॥तत्रस्वल्पोदरेक्षिप्य मासमेकंसमाहितः॥जलुकाजायतेतत्र महामदप्रदायि
नी॥क्षोभयेत्सर्व्वनारीणां महासौभाग्यवर्द्धनी॥कामार्थीसाधकोयश्च क्षोभयेत्स्त्रीसहस्रकं
॥महामदनेश्वरीनाम्ना क्षोभयेद्भुवनत्रयम्॥विदारीकंदमादाय वेरकंदरसंयुतम्॥मर्द्दये

राम॰
१८

त्सूतकंतेन मासमेकंविचक्षणः॥श्वेतव्यालोदरेक्षिप्य जलुकाद्रावणंतथा॥कामभोगमहायुक्तं
द्रावणंभुवनत्रयं॥अथवाजलुकानांतु संक्षेपात्साधकःप्रभो॥हयमारीकंदमादाय सूतकंमर्द
येत्ततः॥गोनसर्प्पोदरेक्षिप्य जलुकाबध्यजायते॥महाकामेश्वरीनाम्ना सर्व्वकामप्रसाधिनी॥अ
थान्यातुजलुकांतु साधयेत्साधकेश्वरि॥गजचांडालिकादंडैः सूतंसंमर्द्यसुन्दरि॥सप्ताहेनमहा
देवि साधयेत्कामहेतुना॥कामेश्वरीनामविख्याता साधकानांहितावहा॥काकाडीकंदमादाय
श्वमारीकन्दसंयुता॥भृंगमारीकन्दसहिता सूतकंमर्द्दनंकुरु॥चित्रव्यालोदरेक्षिप्य कामार्थं
जायतेरसः॥कामेश्वरीत्रिययेश्च क्षोभयेत्साधकोत्तमः॥ ॥अथान्याप्रोच्यतेभद्रे जलुकामद

द्राविणी॥ यथा तु द्रावयेद्वारी साधकं सौख्यदायिनी॥ ग्राहयेत्करवीरं च नरकंदी ह्यमारिका॥
त्वमारीरससमर्द्धं सप्तैकं तु न संशयः॥ पीत्वा लोदरे क्षिप्य जलुका कामभोगिनी॥ सुरदेहं ता श्र
साधकानां संक्षेपात्कथितं मया॥ ॥इति काकचण्डेश्वरीमते जलुकाकल्पः॥ ॥अथान्यां संप्रव
क्ष्यामि साधकानां हितावहं॥ शृणु त्वं देवदेवेशि साधके सिद्धिदायकं॥ भ्रमते भूतले देवि वि
वरे देवकन्यका॥ ददाति साधकं सिद्धिं यद्वीरा वीरवंदिते॥ आषाढकृष्णाष्टम्यां गुरुवारो यदा
भवेत्॥ स्वातिनक्षत्रयोगेन देवकन्याभिगच्छति॥ सर्वविवरये यस्ति साधकं सिद्धिदायका॥ यथा
त्रिचमरैः सर्वे॥ श्रावणे मासि देवेशि कृष्णायां च चतुर्द्दशी॥ गुरुवारे पुष्ययोगे कन्या निर्गच्छते स

दा॥ यथा त्रिचमरैः सर्वैः क्रीडंति सर्वदायकैः॥ भाद्रपदे शायोगानां कृष्णपक्षे चतुर्द्दशी॥ बृहस्पति
भवेद्वारे ह्यय फल्गुणनक्षयोः॥ संयोगे भवते यत्तु कन्या विवरनिर्गता॥ आश्विने मासि योगेन कृ
ष्णा चापि चतुर्द्दशी॥ पुष्यनक्षत्रसंयुक्ता गुरुवारो विधीयते॥ विवरेषु च या कन्या सर्वस्थाने षु पू
जिता॥ कार्त्तिके शुक्ल अमावास्या गुरुवारेण संयुता॥ स्वातो नक्षत्रे समायाति विवरेषु च सर्वतः॥ निर्ग
ता सिद्धियोगेन मार्गशिरसि पूर्णिमायां बृहस्पतिसु शुभे च च॥ मृगशिरस्थयोगेन द्वारे विवरमनायि
का॥ रहस्य चरते वर्षा साधकं सिद्धिसाधयो॥ पौषमासे शुक्लपक्षे प्रतिपद्गुरुवासरे॥ मूलन
क्षत्रसंयोगे देवकन्या च दृश्यते॥ माघशुक्लचतुर्द्दश्यां गुरुवारेण संयुता॥ मूलनक्षत्रसहितं

सर्वकन्याविनिर्गता ॥ फाल्गुणे कृष्णपक्षे तु तिथिश्चाव चतुर्द्दशी ॥ बृहस्पति तथा वारे पुष्य न
क्षत्रसंयुता ॥ कन्याश्च क्रीडते तत्र विवरे च संस्थिता ॥ चैत्रमासे शुक्लपक्षे चतुर्द्दश्यां बृहस्पतौ ॥ मू
लनक्षत्रसंयोगा सर्वविवरोद्घटते ॥ एवं तु सिद्धियोगानि विवरेषु प्रतिष्ठति ॥ क्रीडते देवकन्या
श्चे साधकैः सिद्धिदायकैः ॥ इति काकचंडेश्वरीमते विवरपटलं ॥ ॥ अथान्यं संप्रवक्ष्यामि शै
लोदकविधिर्यथा ॥ दुर्लभं साधकानां च सिद्धियोगं च दुर्लभं ॥ उदकं च तु विज्ञेयं दिव्यसिद्धिक
रं परम् ॥ क्षणवेधी त्र्यहो रात्रं सप्ताहं पक्षवेधकं ॥ मासं वर्षाणि मासं च संवत्सरवेधकं ॥ एतानि शै
लोदकानि सर्वाणि समतुल्यता ॥ तस्यायं तु गुणं वक्ष्ये येन येनापि साधकः ॥ वेधकं च परित्यक्त्वा

वेधकान्तु प्रयोजयेत् ॥ हिंगुलं हरितालं च गंधकं च मनःशिलां ॥ एतेषां गंधमाहारो प्रकरोति च
वेधिकं ॥ शैलोदकं कथ्यते जडे क्षीरं चाष्टगुणेन तु ॥ तत्तु क्षीरं विशेषतः पिवते साधकेश्वरि ॥ एक
विंशति रात्रेण क्षणेन वज्रसाधकः ॥ सुराहिरष्टवर्षैका कामरूपी न संभवः ॥ शैलोदकं गृहीत्वा
कुलत्थेन सहक्काथयेत् ॥ तेन क्वाथे पचेदन्ने दत्वा चाष्टगुणं तथा ॥ गुडगंधमधु सहे यथाहारं
च खेद्ध्या ॥ सत्वायुक्तं भविष्यति नात्र कार्या विचारणा ॥ शैलोदकं गृहीत्वा त्रिफलासम भस्य ये
त् ॥ षोडशभागं विशेषतः तैलं च सह पाचयेत् ॥ गुडतैलेनाभ्यंगं कुर्यात्तं भक्षणान्ततः ॥ ततो
वलीपलितनश्यंति सर्वकुष्टविवर्जितः ॥ दिव्यदेहो यथादेवो जायते साधकस्य च ॥ इति शै

लोहकपारदञ्चस्सरणां॥ ॥मासैकंमाषमूतंच. हस्तेनशतुमर्द्दयेत्॥ निष्टपिष्टोभवेज्जीवेः पुनर्जी
वोप्यतद्रसं॥ तत्प्रयोमासमेकं जरामृत्युविवर्जितः॥ नाशनं॥ अथवातद्रसमाष. कर्षणमा
षहेमकम्॥ गुटिकांकारयेत्तेन. मुखेस्थिताद्दृशीभवेत्॥ षड्भागंचहरेद्रव्यं. जीवेद्ब्रह्मांडतारकं
अथवारसकर्षकं. तत्क्षणेनतुमर्द्दयेत्॥ इगुडीफलमध्येतु. शैलोदकमध्यमंकुरु॥ कालेन
त्रिगुणंचैव. काठिन्यंतस्यजायते॥ षण्मासेनमुखधार्ये. वज्रकायोभवेन्नरः॥ वसनागघृतेश्रा
णो. दिव्यसहस्रमोदते॥ ततोदकेपिवेद्धाम. तत्क्षीरार्द्धेनपायसं॥ मासैकंतुप्रयोगेन. सहस्रा
युर्भवेन्नरः॥ ततोदकंहरीत्वातु. हरीतकीमहत्क्वाथयेत्॥ घृतेनमधुनालेह्यं. त्रिंधभांडेनस्था

पयेत्॥ सप्तैकंभूमिमध्यस्थं. एकैकंभक्षयेत्पुनः॥ वलीपलितनिर्मुक्तो. जीवेद्वर्षशतद्वयं॥ तत्तो
दकेनमर्द्दन. अभ्रकंक्वाथकारयेत्॥ सप्तरात्रपुटपाकं. भस्मतंजायतेरसं॥ कुरुतेमासमेकंतु
वलीपलितहतंभवेत्॥ अथशैलोदकंमर्द्य. घृतेनसहलेहयेत्॥ मासैकेनप्रयोगेन. जरामृत्यु
र्विनश्यति॥ शैलोदकंतुलत्थेन. क्वाथंकृत्वापुनःसयेत्॥ घृतंचमधुनासहितं. लेह्यंचपिवते
सदा॥ मासैकंचप्रयोगेन. वलीपलितवर्जितः॥ महाकायोमहावीर्यः सहस्रायुःसजीवति॥ अ
थवाकिंवहूक्तेन. विधानंप्रायययोजिभिः॥ दिव्यदेहधरश्चैव. आयुर्वर्द्धयतेसदा॥ कुष्मांडानिच
मयानि. फलानियानिकानिच॥ लोहानिसिध्यशैलेषु. पंचमूतंभक्षमेवच॥ सीरभोजपचजीवंति

वज्रकायो भवेन्नरः॥ सर्वज्ञो दिव्यदेहश्च अयुतायुर्भविष्यति॥ भक्षयेत्शालिषष्टैश्च तृषावरे
यतः॥ परिहारं त्रयो मयोः वर्षेण कल्पायुश्च भवेत भवते साधकेश्वरः॥ इंगुदीनंतु वीजानि शैले
भूतंजलेस्थितम्॥ तेनैव प्रतिपायेन वंगस्तंभं करोति च॥ पारदेन च संयुक्त पानीयविषनाशनम
॥ रसोपरि समसहितं सजरसेन वेष्टितं॥ कुंडमध्ये प्रक्षिपेत यावत्तु कठिनं भवेत॥ सहस्रांशेन
लोहानि वेधंतु कनकं भवेत्॥ गुडस्यतु फलं ग्राह्यं कर्षश्चैव रसस्य च॥ तेनोदकेन मर्दंतु कांस्य
पात्रे निधापयेत्॥ तस्मिंस्तु कुंडे निक्षिप्तं कठिनंतु यदा भवेत॥ तं मुखेन च धारयेत्व्यं सर्वरोगाप
हारकं॥ दशनागायुतप्राणो वज्रकायस्तु योजयेत्॥ उदरेतु चिरंकाल भुंमे साहें न संशयः॥ अ

थसंलोहकं ग्राह्यं मेषशृंगे निधारयेत्॥ अपरस्तेपरंतंतु चूर्णं भवति शोभनं॥ तेन नागशतांशेन
निर्वीजं कनकं भवेत्॥ त्रिसुनाराधिता पृथ्वी अर्कातोदरते पुरा॥ भारेण कुंदते यस्तु वेदं पश्यति
वर्त्तनम्॥ शैलोदकमिति ज्ञेयं विद्युरवेदं तथा भवेत्॥ घृतभक्षशरीरस्तु नित्यव्यायामतत्परः॥ म
ईनं च धकर्तव्यं शैलोदकरसायने॥ अजरो अमरश्चैव वज्रकायो महाबलः॥ इति काक चंडेश्वरी
मते शैलोदकपटलः॥ ॥श्रीदेव्युवाच॥ कैलासशिखरे रम्ये देवदेवं जगद्गुरुं॥ पृच्छामि त्वमसा
देवं कल्पं वेतालकस्य च॥ साधकानां हितार्थाय मृत्युदारिद्र्यनाशनम्॥ ॥श्रीईश्वरउवाच॥ सा
धुसाधु महाभागे यत्त्वया परिपृच्छति॥ साधकानां हितार्थाय दुर्लभं कथ्यते मया॥ शालितंडुलतोये

न तालकं च वरानने ॥ ततः पश्चाद्वरारोहे पेषयेत्तंडुलैः सह ॥ षष्ठिकापृष्ठसहितं गोलकं कारये
त्पुनः ॥ प्रक्षिप्योदकमध्येन ततः सम शीतं जायते ॥ शोषितं सूर्यतापेन चूर्णं कृत्वा विचूर्णितं ॥ भ
क्षितं मधुसर्पिर्भ्यां सप्तरात्रं समाहितः ॥ उदयादित्यवर्णाभः स्वरूपः प्रियदर्शनः ॥ खेचरत्वमवा
प्नोति महाबलपराक्रमः ॥ द्वितीये सप्तके देवि पतन्ति शशिमूर्द्धजाः ॥ त्वचादंतानि सर्वं तु नवा
श्चैव न संशयः ॥ तृतीये सप्तके देवि केशभ्रमरसंनिभम् । तप्तकाञ्चनवर्णाभः द्विरष्टवर्षकाकृ
तिः ॥ शंखकुन्देन्दुपुष्पैश्च नखांगुलिसन्निभा ॥ नवनागबलो भूत्वा जीवेच्चंद्रार्कतारकं ॥ ॥
पुनरन्यं प्रवक्ष्यामि तालकस्य शुभो विधिः ॥ तालकं शोधयेद्देवि मर्दयेत्तेन सूतकम् ॥ भक्षये

त्प्रत्यहं देवि मासैकं च दिने दिने ॥ यावत्कर्षप्रमाणं तु दिनानामेकविंशतिं ॥ अष्टादशैक कुष्ठा
नि उत्पन्नानि विनाशयेत् ॥ उदयादित्यसंकाशं जायते सिद्धिकेश्वरि ॥ प्राप्यते सिद्धियोगं तु लभ
ते सिद्धिमुत्तमां ॥ वलीपलितनिर्मुक्तो द्विरष्टवर्षकाकृतिः ॥ नवनागबलो भूत्वा जीवेच्चन्द्रार्क
तारकं ॥ जलकाष्ठं च संगृह्य कृत्वा वापि समुद्गकं ॥ तेन घृतेन संशोध्य तालकं निश्चणेन तु ॥ आ
षाढमासयोः पंच यावत्कार्तिकपूर्णिमा ॥ शुष्कांते स्थितं मध्ये उद्धरेत्तं शुभे दिने ॥ मर्दयेत्ते
न सूतं च माषैकं भक्षयेत्तु ॥ प्रातरुत्थाय मेधावी सप्ताहं च दिने दिने ॥ द्वितीये सप्तके चैव
केशा भ्रमरसंनिभाः ॥ सौभाग्यारोग्यश्रीमांश्च नारीहृदयनन्दनः ॥ मासमेकप्रयोगेन अमरः

सहस्रीउति॥ व्रह्मवृक्षस्यकाष्ठेन एवंकृत्वाप्रयत्नतः॥ तालकंरससंयुक्तं धात्रीमर्दनियोजये
त॥ महिषीपुरीषवेष्टंतत्वेष्ठयानचमिश्रते॥ दिनानामेकविंशंच शोषितंयावज्जायते॥ भक्ष
येत्तंरससिद्धं वृहस्पतिसमोभवेत्॥ नानाशास्त्रार्थसवादी अवध्यो सर्वभूतले॥ तालकंपा
रदंचैव एकीकृत्वातुमर्दयेत्॥ तालमूलीरसंचैव मर्दयेद्रससंयुतं॥ जम्बीरकाष्ठैः सम्म
र्द्य लोहस्यभाजनकुरु॥ तंतालकंगृहीत्वातु क्षिपेज्जंवीरपूरके॥ महिषीस्थानेचवेष्ट्यं
पचेन्निर्गच्चतांव्रजेत्॥ पुनःपारदसंयुक्तो मातुलिंगेनपाचयेत्॥ तांबूलपत्रसहितं मा
षैकंचैवभक्षयेत्। मासमेकप्रयोगेन इष्टसिद्धिर्भविष्यति॥ रंजनेसर्वलोहानि पुटपाके

नकांचनं॥ ॥इतिकाकचंडेश्वरीमतेतालककल्पंसमाप्तम्॥ ॥हरितालसत्वपातनः॥ ॥
रसंचतालकंचैव लोहपात्रेणमर्दयेत्॥ वीजपूरकमध्येतु महिषीगोमयेनछादयेत्॥ तांबूल
पत्रमध्येतु माषमेकंतुभक्षयेत्॥ मासमेकप्रयोगेन जीवेच्चंद्रार्कतारकं॥ कांतपात्रकंचैव रसं
गंधकमेवच॥ मर्दयेत्त्रिदिनंतेन यावद्भवतिगोलकं॥ निंबकल्पः॥ ॥पिचुमंदोदरेस्थाप्य वर्षमे
कंतुसाधकः॥ षण्मासंभक्षयेद्यस्तु जीवेच्चंद्रार्कतारकं॥ त्रिदिनंमर्दितंसूतं शाल्मलीवृक्षेस्थापये
त्॥ वर्षमेकप्रमाणेन तंभक्षयेत्पुनः पुनः॥ षण्मासंचप्रयोगेन जीवेच्चंद्रार्कतारकं॥ पुनरन्यं
प्रवक्ष्यामि भस्मसूतविधिं -- ।देवदालीरसंमर्द्य रससंगंधकमेवच ।पाचयेत्पुटपाकेन भस्म

भवतिसूतकं॥ भक्षयेत्तांबूलपत्रेण माषैकंमासमेवच॥ पक्षमेकप्रमाणेन कुक्षिकुष्टादिसाध
के॥ एवंप्रयोगेनभक्षयेत् भक्षयेन्पलंदश॥ वलीपलितनिर्मुक्तो महावलपराक्रमः॥ सुव
र्णदृष्टिर्मेधावी जीवेद्वर्षशतद्वयं॥ त्रिगुणंभक्षयेत्प्राज्ञो भस्मसूतविधौसह॥ पंचवर्षशतान्ये
व जीवेद्वसावकेश्वरि॥ इतिलघुसूतकं॥ ॥ ॐ सःसः स्रावय२ अमृतंस्रावय ॐ महोहंहंस
स्वाहा कुरुकुरु सोमंचमरसः॥ शाल्मलीछेदनमंत्रः॥ ॥ पुनरन्यंप्रवक्ष्यामि महाले(ह)यंयथा
विधि॥ निशाचरहतंसूतं धात्रीफलरतंतीक्ष्णं॥ त्रिफलामधुसर्पिर्भ्यां योलिहेत्सोजरामरः
॥ गंधकंपारदंचैव तीक्ष्णंचकांतिमेवच॥ समधातोसमंध्यात पलाशवीजमात्रयो॥ त्रिपोव

वाह्वयंजानी शिलाजितत्रिफलासह॥ एतानिसमभागानि अर्कधात्रीवमर्दयेत्॥ तंडुलीयरसंत
स्मा त्रिफलासहमर्दयेत्॥ खदिरक्काथसंयुक्तां शिखिपित्तसमन्वितम्॥ मर्दयेत्तुविधानेन अर्क
स्यतुरसैःसह॥ त्रिफलारसक्कातंच कांतिसम्पुस्थापयेत्॥ गोजिह्वात्रिफलायाश्च वाह्यलेपानि
कारयेत्॥ तंवाद्यमृत्तिकालेपं मृन्मयचांडुस्थापयेत्॥ पुटयोगेनभूमौतु निखनेज्ञानुमात्रके॥
अधोर्ध्वपातदातव्यं मृत्तिकालेपगोमयं॥ नित्यानिगंधधूपानि संवत्सरैकमेवच॥ पूजांकृत्वातु
